# Shiva Ashtottarashata Nama Stotram 2

# શિવાષ્ટોત્તરશતનામસ્તોત્રમ્ ૨

## Document Information

Text title : Shiva Ashtottarashatanama stotram 2

File name : shivAShTottaranAmashatakastotram2.itx

Category : aShTottarashatanAma, shiva, skandapurANa

Location : doc_shiva

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, stotrasankhyA 211. See corresponding nAmAvalI

Source : skandapurANe sahyAdrikhaNDe

Latest update : February 17, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 19, 2025

*sanskritdocuments.org*

# શિવાષ્ટોત્તરશતનામસ્તોત્રમ્ ૨

શ્રીગણેશાય નમઃ ।
દેવા ઊચુઃ ।
ૐ જય શમ્ભો વિભો રુદ્ર સ્વયમ્ભો જય શઙ્કર ।
જયેશ્વર જયેશાન જય સર્વજ્ઞ કામદ ॥ ૧॥

નીલકણ્ઠ જય શ્રીદ શ્રીકણ્ઠ જય ધૂર્જટે ।
અષ્ટમૂર્તેઽનન્તમૂર્તે મહામૂર્તે જયાનઘ ॥ ૨॥

જય પાપહરાનઙ્ગનિઃસઙ્ગાભઙ્ગનાશન ।
જય ત્વં ત્રિદશાધાર ત્રિલોકેશ ત્રિલોચન ॥ ૩॥

જય ત્વં ત્રિપથાધાર ત્રિમાર્ગ ત્રિભિરૂર્જિત ।
ત્રિપુરારે ત્રિધામૂર્તે જયૈકત્રિજટાત્મક ॥ ૪॥

શશિશેખર શૂલેશ પશુપાલ શિવાપ્રિય ।
શિવાત્મક શિવ શ્રીદ સુહૃચ્છ્રીશતનો જય ॥ ૫॥

સર્વ સર્વેશ ભૂતેશ ગિરિશ ત્વં ગિરીશ્વર ।
જયોગ્રરૂપ મીમેશ ભવ ભર્ગ જય પ્રભો ॥ ૬॥

જય દક્ષાધ્વરધ્વંસિન્નન્ધકધ્વંસકારક ।
રુણ્ડમાલિન્ કપાલિંસ્થં ભુજઙ્ગાજિનભૂષણ ॥ ૭॥

દિગમ્બર દિશાં નાથ વ્યોમકેશ ચિતામ્પતે ।
જયાધાર નિરાધાર ભસ્માધાર ધરાધર ॥ ૮॥

દેવદેવ મહાદેવ દેવતેશાદિદૈવત ।
વહ્નિવીર્ય જય સ્થાણો જયાયોનિજસમ્ભવ ॥ ૯॥

ભવ શર્વ મહાકાલ ભસ્માઙ્ગ સર્પભૂષણ ।
ત્ર્યમ્બક સ્થપતે વાચામ્પતે ભો જગતામ્પતે ॥ ૧૦॥

શિપિવિષ્ટ વિરૂપાક્ષ જય લિઙ્ગ વૃષધ્વજ ।
નીલલોહિત પિઙ્ગાક્ષ જય ખટ્વાઙ્ગમણ્ડન ॥ ૧૧॥

કૃત્તિવાસ અહિર્બુધ્ન્ય મૃડાનીશ જટામ્બુભૃત્ ।
જગદ્ભ્રાતર્જગન્માતર્જગત્તાત જગદ્ગુરો ॥ ૧૨॥

પઞ્ચવક્ત્ર મહાવક્ત્ર કાલવક્ત્ર ગજાસ્યભૃત્ ।
દશબાહો મહાબાહો મહાવીર્ય મહાબલ ॥ ૧૩॥

અઘોરઘોરવક્ત્ર ત્વં સદ્યોજાત ઉમાપતે ।
સદાનન્દ મહાનન્દ નન્દમૂર્તે જયેશ્વર ॥ ૧૪॥

એવમષ્ટોત્તરશતં નામ્નાં દેવકૃતં તુ યે ।
શમ્ભોર્ભક્ત્યા સ્મરન્તીહ શૃણ્વન્તિ ચ પઠન્તિ ચ ॥ ૧૫॥

ન તાપાસ્ત્રિવિધાસ્તેષાં ન શોકો ન રુજાદયઃ ।
ગ્રહગોચરપીડા ચ તેષાં ક્વાપિ ન વિદ્યતે ॥ ૧૬॥

શ્રીઃ પ્રજ્ઞાઽઽરોગ્યમાયુષ્યં સૌભાગ્યં ભાગ્યમુન્નતિમ્ ।
વિદ્યા ધર્મે મતિઃ શમ્ભોર્ભક્તિસ્તેષાં ન સંશયઃ ॥ ૧૭॥

ઇતિ શ્રીસ્કન્દપુરાણે સહ્યાદ્રિખણ્ડે
શિવાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*Shiva Ashtottarashata Nama Stotram 2*

pdf was typeset on March 19, 2025

Please send corrections to *sanskrit@cheerful.com*